## आप्ज्ञप्यृधामीत् । (५५/२६१९)

आप् ज्ञपि ऋध इत्येतेषामङ्गानाम् [1]अच ईकारादेशो भवति सनि सकारादौ परतः । आप्–ईप्सति । ज्ञपि–ज्ञीप्सति । ऋध् – ईर्त्सति । ज्ञपेः द्वावचौ, तत्र [2]णेः पूर्वविप्रतिषेधेन लोपः, इतरस्य तु ईत्वम् । सनि इत्येव, [3]प्राप्स्यति । सि इत्येव, [4]जिज्ञपयिषति । अर्दिधिषति । सनीवन्तर्ध (७.२.४९/२६१८) इति ज्ञपेः ऋधेश्च इटो विकल्पः ॥

## दम्भ इच्च । (५६/२६२१)

दम्भेः [5]अच इकारादेशो भवति, चकारात् ईत् च सनि सकारादौ परतः । धिप्सति, धीप्सति । सि इत्येव, दिदम्भिषति[6] ॥

## मुचोऽकर्मकस्य गुणो वा । (५७/२६२४)

मुचोऽकर्मकस्य गुणो वा भवति सनि सकारादौ परतः । 'हलन्ताच्च' (१.२.१०/२६१३) इति कित्त्वप्रतिषेधो विकल्प्यते । [7]मोक्षते वत्सः स्वयमेव, [8]मुमुक्षते वत्सः स्वयमेव । अकर्मकस्य इति किम् ? मुमुक्षति वत्सं देवदत्तः । कर्मकर्तरि मुचिरकर्मको भवति, कर्मविशेषस्य [9]अविवक्षिताद्वा ॥

## अत्र लोपोऽभ्यासस्य । (५८/२६२०)

यदेतत् प्रक्रान्तं सनि मीमा (७.४.५४/२६२३) इत्यादि मुचोऽकर्मकस्य (७.४.५७/२६२४) इति यावत्, अत्र [10]अभ्यासलोपो भवति । तथैव उदाहृतम् । अभ्यासस्य इत्येतच्च अधिकृतं वेदितव्यम् आ अध्यायपरिसमाप्तेः । इत उत्तरं यद् वक्ष्यामः अभ्यासस्य इत्येवं तद् वेदितव्यम् । वक्ष्यति, 'ह्रस्वः' (७.४.५९/२१८०)–डुढौकिषते[11] । तुत्रौकिषते[12] । [13]सनि मीमाघुरभलभशकपतपदामच इस्, अभ्यासलोपश्च, इत्येवं सिद्धे यदत्रग्रहणमिह क्रियते, तद् विषयावधारणार्थम्, अत्रैव अभ्यासलोपो भवति, सन्वद्भावविषये न भवति । [14]अमीमपत् । अदीदपत् । 'सन्वल्लघुनि चङ्परेऽनग्लोपे' (७.४.९३/२३१६) इति सन्वद्भावात् प्राप्नोति । सर्वस्य अभ्यासस्यायं लोपः इष्यते, तदर्थमेव केचित् अत्रग्रहणं वर्णयन्ति । 'नानर्थकेऽलोऽन्त्यविधिः' (व्या.प. ६२) इत्यपरे सर्वस्य कुर्वन्ति ॥

## ह्रस्वः । (५९/२१८०)

ह्रस्वो भवति अभ्यासस्य । डुढौकिषते । तुत्रौकिषते । डुढौके । तुत्रौके । अडुढौकत् । अतुत्रौकत् ।

[८७७] अभ्यासस्यानचि । (म.भा. ३.३५२)

अभ्यासस्य यदुच्यते अनचि तद् भवति इति वक्तव्यम् । चराचरः । चलाचलः । पतापतः । वदावदः । हलादिः शेषो (७.४.६०/२१७९) न भवति ॥

---

1. अचः स्थाने इ. ह. 2. पूर्वविप्रतिषेधेन णेः लोपः इ. 3. आप्स्यति इ. 4. जिज्ञापयिषति इ. ह. 5. अचः स्थाने इ. 6. इटो विकल्पः पूर्ववत् इत्यधिकम् इ.ह. 7. मोक्ष्यते क. 8. मुमुक्ष्यते क. 9. अविवक्षायाम् ब 10. अभ्यासस्य लोपो ड. 11. डुढौके अडुढौकत इत्यधिकम् क. 12. तुत्रौके अतुत्रौकत इत्यधिकम् क. 13. सनि नास्ति क. 14. अमीमदत ड.